# A-I/1/1274/21

## प्रथमसत्रार्द्धम्

## प्रथमपत्रम्

## पुराणेतिहासः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. कीदृशः राजा प्रजाः रञ्जयति ?
2. पौरहितैषिणा सगरेण कथम् असमञ्जाः व्यक्ताः ?
3. अवलिप्तस्य गुरोः कः शाश्वतः भवति ?
4. राज्ञां कः सनातनधर्मः कथितः ?
5. कथं राजा हिमवानिव भूतानां विश्वास्यो जायते ?
6. राजसत्तमः राजा कः ?
7. राजा कैः आत्मसम्बन्धिनः परीक्षेत ?
8. कौ भूमिं ग्रसेते ?
9. वन्याश्रमपदं कथं लभेत ?
10. सन्यासी कथं तिष्ठेत् ?
11. सुनीथा कस्य दुहिता कस्य च मातेति उक्ता ?

**अथवा**

स्वयंभुवा प्रोक्तानि कामजव्यसनानि कानि ?

12. शान्तिपर्वणि कति आश्रमाः उक्ताः ? के च ते ?

**अथवा**

राजधर्मे कति सन्धयः सन्ति ? के च ते ?

13. निषादाः कथं सम्भूताः ?

**अथवा**

राजा पृथुः कैः अभिषेचितः ?

14. कः ब्राह्मणः निरयं प्रयाति ?

**अथवा**

किं धर्माश्रमपदं भवेत् ?

15. केषु राज्येषु धर्मो न व्यवतिष्ठते ?

**अथवा**

कः साधकः ब्रह्मसममश्नुते ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. राज्ञः के गुणाः सततं स्थिराः स्युः ? प्रतिपादयत।

17. दण्डनीत्या युगनिर्माणं कथं जायते पर्यालोचयत।

18. कर्त्तव्यपालनमहत्त्वं पठितग्रन्थदिशा विमृशत।

**अथवा**

विष्णुमान्धाता सम्बादरहस्यमुद्घाटयत।

19. राज्ञः परमकर्त्तव्यानि निरूपयत।

**अथवा**

स्वधर्मेवर्त्तमानः वैश्यः किं कुर्यात् आलोचयत।

20. भीष्मकृत–श्रीकृष्णस्तुतेः महत्त्वं विशदयत।

**अथवा**

राज्यरक्षासाधनानि महाभारतदिशा प्रतिपादयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. "राजा युगचतुष्टयकारणम्" इति शीर्षकोपेतः प्रबन्धः लेख्यः।

**अथवा**

वर्णाश्रमधर्मान् महाभारतदिशा पर्यालोचयत।

**अथवा**

महाभारतदिशा राष्ट्ररक्षोपायाः विवेचनीयाः।

# A-I/2/1275/21

## प्रथमसत्रार्द्धम्

## द्वितीयपत्रम्

## पुराणेतिहासः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. केषाम् ऋषभ-पुत्राणां नवयोगेश्वरेषु गणना क्रियते?
2. केन प्रियव्रतः अवगतपरमार्थतत्त्वः जातः?
3. उत्तमतामसरैवताः के? एते केषामधिपतयः बभुवुः?
4. गृहाश्रमः कस्य अवद्यं न करोति?
5. किमर्थमादिदेवः स्वभवनादवततार?
6. देवयानी कस्य दुहिता कथिता?
7. प्रियव्रतेन कति द्वीपाः सृष्टाः? के च ते?
8. केन मैत्रीं न कुर्यात्?
9. भरतः तपस्यायै कं वनं जगाम?

**अथवा**

श्रीमद्भागवते कति स्कन्धाः श्लोकाश्च सन्ति?

10. कथं भद्रकाली सहसा उच्चचाट?

**अथवा**

नाभिः समाधिना कं देवमुपासितवान्?

11. महत्सेवां कस्य द्वारमाहुः?

**अथवा**

राजर्षिभरतः कस्य कन्यकामुपयेमे?

12. हरिः कुत्र केषां वात्सल्येन सन्निधाप्यते?

**अथवा**

कालाञ्जरपर्वते मृगशरीरं कः प्राप्तवान्?

13. के ऋषभपुत्राः भागवतधर्मदर्शनाः बभुवुः?

**अथवा**

का जयन्ती? सा कान् जन्म दत्तवती?

14. ऋषभदेवः कस्यावतारेति अभिहितः?

15. पञ्चमस्कन्धे भागवतस्य किं लक्षणमभिहितम्?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पूर्वचित्ति-अप्सरसः सौन्दर्यं वर्णयत।

17. मृगसुतहीनस्य राजर्षिभरतस्य व्याकुलतां वर्णयत।

18. ऋषभदेवस्याजगरवृत्तिं ग्रन्थदिशा आलोचयत।

**अथवा**

गुरुर्नसस्यात् स्वजनो न स स्यात्  पितानस स्यात् जननी न सा स्यात्।

दैवं न तत् स्यानप्रतिश्च स स्यात्  न मोचमेद्यः समुपेतमृत्युम्।

-पद्यस्य समुचिता व्याख्या विधेया॥

19. ऋषभदेवस्य सदुपदेशान् वर्णयत्।

**अथवा**

प्रियव्रतकृतं भूविभाजनप्रकारं समुपस्थापयत।

20. मकरध्वजवशमुपनीतस्याग्निध्रस्य जडतां वर्णयत।

**अथवा**

“यदयच्छीर्षव्याचरितं तत्तदनुवर्त्तते लोकः” उक्तेः भावः लेख्यः।

**स. एकः प्रश्नः समाधेयः।** **(20×1=20)**

21. प्रियव्रतवंशं पठितग्रन्थदिशा वर्णयत।

**अथवा**

अग्निध्रचरितं श्रीमद्भागवताधारेण वर्णयत।

**अथवा**

रहूगणभरतयोः आलापं सविस्तरं प्रतिपादयत।

# A-I/3/1276/21

## प्रथमसत्रार्द्धम्

## तृतीयपत्रम्

## पुराणेतिहासः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. वासुदेवकथा कान् पुनाति ?
2. भगवान् कुत्र जनिष्यते इति ब्रह्मणोक्तम् ?
3. उत्तमश्लोकगुणानुवादात् कः विरज्येत ?
4. कैः सह ब्रह्मा क्षीरपयोनिधेस्तीरं जगाम ?
5. नारदः कंसं किमभिहितवान् ?
6. जन्मवतां देहेन सहः कः जायते ?
7. कथं बलं सकर्षण इति प्राहुः ?
8. व्रजकुमारिकाः कं मन्त्रं जपन्त्यः पूजां चक्रुः ?
9. केषां कामः कामाय न कल्पते ?
10. केषां जन्म वरं केभ्यश्च अर्थिनः विमुखाः न यान्ति ?
11. वृन्दावनं भुवः कीर्तिं कथं वितनोति ?

**अथवा**

मूढमतयः हरिण्यः कथं धन्याः भवन्ति स्म ?

12. विमानगतयः देव्यः कथं मुमुहुः ?

**अथवा**

कदा जलदा सर्वस्वं हित्वा शुभ्रवर्चसः विरेजुः ?

13. मेघे वर्षति हरिः कीदृशं वनं प्राविशत् ?

**अथवा**

कथं मण्डूकाः गिरः व्यसृजन् ?

14. स्वप्रजाकृतः अपराधः केन सोढव्यः ?

**अथवा**

भगवत्पादरजाः प्रपन्नाः किं न वाञ्छन्ति ?

15. कृष्णे न्यस्तेक्षणा भीताः काः रुदत्य इव तस्थिरे ?

**अथवा**

पशुपाङ्गजः कः ? तस्मै कः ननामे ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. शरदृतुं पठितग्रन्थदिशा वर्णयत।

17. श्रीमद्भागवतमाधृत्य वर्षर्तुशोभां समुपस्थापयत।

**अथवा**

वसुदेवकृत-स्तुतेः सारं लिखत।

18. श्रीकृष्णाभिषेकलीला प्रतिपादनीया।

**अथवा**

अज्ञानसंज्ञौ भवबन्धमोक्षौ द्वौनामनान्यौस्त ऋतज्ञभावात्।

अजस्रचित्यात्मनि केवलेपरे विचार्यमाणे तरणाविवाहनी॥ -सप्रसङ्गं व्याख्या कार्या।

19. कालियदमनलीलां सविस्तरं प्रतिपादयत।

**अथवा**

गर्भस्तुतेः साराशं प्रतिपादयत।

20. श्रीकृष्णगर्भप्रवेशविषये टिप्पणी देया।

**अथवा**

भगवता कृतं पृथिव्याश्वासनं वर्णयत।

**स. एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. भगवता कृतं गोपीवस्त्रहरणं सविस्तरं वर्णयत।

**अथवा**

ब्रह्मस्तुतेः महत्वं विवेचनीयम्।

**अथवा**

श्रीमद्भागवतस्य महापुराणत्वं साधयत।

# A-I/4/1277/21

## प्रथमसत्रार्द्धम्

## चतुर्थपत्रम्

## पुराणेतिहासः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. द्रुते चित्ते विनिक्षिप्तः स्वाकारः केन शब्देन कथ्यते ?
2. कामक्रोधादयः कस्य तापकाः ?
3. द्रवतायां प्रविष्टं सद्वस्तु काठिन्ये सति मुञ्चति न वा ?
4. केषां मते चित्तं विषयाकारं न गृह्णाति ?
5. कुत्र प्रविष्टः सुखाकारः रसः भवति ?
6. एकैकं वस्तु व्याकारं कथमीक्ष्यते ?
7. कान्तादिमानेन मेयं किम् ?
8. गुणमयी का ?
9. मनोगतः वस्त्वाकारः किं नाम्ना अभिधीयते ?
10. शिथिलीभावं मनः कथं जायते ?
11. व्यञ्जकः आलोकः कस्य आकारं गृह्णाति ?

**अथवा**

पुमर्थं नाम किम् ?

12. विषययोगेन मनः किं गृह्णाति ?

**अथवा**

अखिलतुष्ट्यै कः किं व्यनक्ति ?

13. सन्निधानकामजन्यरतेः भेदौ कौ ?

**अथवा**

चिरकालेन निपीडिताः के ?

14. गुणमयी का ?

**अथवा**

कीदृशी धीः न गृह्णाति न वास्यते ?

15. चित्तद्रवत्वोपायाः नारदेन कुत्र वर्णिताः ?

**अथवा**

को नाम हर्षः ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. भगवद्भक्तिरसायनस्य प्रयोजनं विमृशत।

17. चित्तस्य तापकान् प्रतिपादयत।

18. चित्ते प्रविष्टस्य भावस्य स्थायित्वं निरूपयत।

**अथवा**

क्रोधस्य चित्रद्रावकत्वं साधयत।

19. स्थायिनः परमानन्दत्वं निरूपयत।

**अथवा**

श्रृङ्गारस्य बलवत्तरत्वं विमृशत।

20. चित्रस्य विषयाकारत्वं पर्यालोचयत।

**अथवा**

तमोभिभूतरतिं लिखत।

**स. एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. भक्तेः लक्षणं स्वरूपञ्च ग्रन्थदिशा समुपस्थापयत।

**अथवा**

भक्तिरसायनस्य वर्ण्यविषयान् प्रतिपादयत।

**अथवा**

रसानुभवप्रकारः विमृश्यताम्।